# આદિત્ય હૃદયમ્

adityahridayastotra.co

તતો યુદ્ધ પરિશ્રાંતં સમરે ચિંતયાસ્થિતમ્ ।
રાવણં ચાગ્રતો દૃષ્ટ્વા યુદ્ધાય સમુપસ્થિતમ્ ॥

દૈવતૈશ્ચ સમાગમ્ય દ્રષ્ટુમભ્યાગતો રણમ્ ।
ઉપાગમ્યાબ્રવીદ્રામં અગસ્ત્યો ભગવાન્ ઋષિઃ ॥

રામ રામ મહાબાહો શૃણુ ગુહ્યં સનાતનમ્ ।
યેન સર્વાનરીન્ વત્સ સમરે વિજયિષ્યસિ ॥

આદિત્યહૃદયં પુણ્યં સર્વશત્રુ-વિનાશનમ્ ।
જયાવહં જપેન્નિત્યં અક્ષય્યં પરમં શિવમ્ ॥

સર્વમંગળ-માંગળ્યં સર્વપાપ-પ્રણાશનમ્ ।
ચિંતાશોક-પ્રશમનં આયુર્વર્ધનમુત્તમમ્ ॥

રશ્મિમંતં સમુદ્યંતં દેવાસુર નમસ્કૃતમ્ ।
પૂજયસ્વ વિવસ્વંતં ભાસ્કરં ભુવનેશ્વરમ્ ॥

સર્વદેવાત્મકો હ્યેષ તેજસ્વી રશ્મિભાવનઃ ।
એષ દેવાસુર-ગણાન્ લોકાન્ પાતિ ગભસ્તિભિઃ ॥

એષ બ્રહ્મા ચ વિષ્ણુશ્ચ શિવઃ સ્કંદઃ પ્રજાપતિઃ ।
મહેંદ્રો ધનદઃ કાલો યમઃ સોમો હ્યપાં પતિઃ ॥

પિતરો વસવઃ સાધ્યા હ્યશ્વિનૌ મરુતો મનુઃ ।
વાયુર્વહ્નિઃ પ્રજાપ્રાણઃ ઋતુકર્તા પ્રભાકરઃ ॥

આદિત્યઃ સવિતા સૂર્યઃ ખગઃ પૂષા ગભસ્તિમાન્ ।
સુવર્ણસદૃશો ભાનુઃ હિરણ્યરેતા દિવાકરઃ ॥

હરિદશ્વઃ સહસ્રાર્ચિઃ સપ્તસપ્તિ-ર્મરીચિમાન્ ।
તિમિરોન્મથનઃ શંભુઃ ત્વષ્ટા માર્તાંડકોંડશુમાન્ ॥

હિરણ્યગર્ભઃ શિશિરઃ તપનો ભાસ્કરો રવિઃ ।
અગ્નિગર્ભોऽદિતેઃ પુત્રઃ શંખઃ શિશિરનાશનઃ ॥

વ્યોમનાથ-સ્તમોભેદી ઋગ્યજુઃસામ-પારગઃ ।
ઘનાવૃષ્ટિરપાં મિત્રઃ વિંધ્યવીથી પ્લવંગમઃ ॥

આતપી મંડલી મૃત્યુઃ પિંગળઃ સર્વતાપનઃ ।
કવિર્વિશ્વો મહાતેજા રક્તઃ સર્વભવોદ્ભવઃ ॥

નક્ષત્ર ગ્રહ તારાણાં અધિપો વિશ્વભાવનઃ ।
તેજસામપિ તેજસ્વી દ્વાદશાત્મ-ન્નમોऽસ્તુ તે ॥

નમઃ પૂર્વાય ગિરયે પશ્ચિમાયાદ્રયે નમઃ ।
જ્યોતિર્ગણાનાં પતયે દિનાધિપતયે નમઃ ॥

જયાય જયભદ્રાય હર્યશ્વાય નમો નમઃ ।
નમો નમઃ સહસ્રાંશો આદિત્યાય નમો નમઃ ॥

નમ ઉગ્રાય વીરાય સારંગાય નમો નમઃ ।
નમઃ પદ્મપ્રબોધાય માર્તાંડાય નમો નમઃ ॥

બ્રહ્મેશાનાચ્યુતેશાય સૂર્યાયાદિત્ય-વર્ચસે ।
ભાસ્વતે સર્વભક્ષાય રૌદ્રાય વપુષે નમઃ ॥

તમોઘ્નાય હિમઘ્નાય શત્રુઘ્નાયા મિતાત્મને ।
કૃતઘ્નઘ્નાય દેવાય જ્યોતિષાં પતયે નમઃ ॥

તપ્ત ચામીકરાભાય વહ્નયે વિશ્વકર્મણે ।
નમસ્તમોऽભિ નિઘ્નાય રવયે લોકસાક્ષિણે ॥

નાશયત્યેષ વૈ ભૂતં તદેવ સૃજતિ પ્રભુઃ ।
પાયત્યેષ તપત્યેષ વર્ષત્યેષ ગભસ્તિભિઃ ॥

એષ સુપ્તેષુ જાગર્તિ ભૂતેષુ પરિનિષ્ઠિતઃ ।
એષ એવાગ્નિહોત્રં ચ ફલં ચૈવાગ્નિ હોત્રિણામ્ ॥

વેદાશ્ચ ક્રતવશ્ચૈવ ક્રતૂનાં ફલમેવ ચ ।
યાનિ કૃત્યાનિ લોકેષુ સર્વ એષ રવિઃ પ્રભુઃ ॥

એન માપત્સુ કૃચ્છ્રેષુ કાંતારેષુ ભયેષુ ચ ।
કીર્તયન્ પુરુષઃ કશ્ચિન્નાવશીદતિ રાઘવ ॥

પૂજયસ્વૈન મેકાગ્રઃ દેવદેવં જગત્પતિમ્ ।
એતત્ ત્રિગુણિતં જપ્ત્વા યુદ્ધેષુ વિજયિષ્યસિ ॥

અસ્મિન્ ક્ષણે મહાબાહો રાવણં ત્વં વધિષ્યસિ ।
એવમુક્ત્વા તદાગસ્ત્યો જગામ ચ યથાગતમ્ ॥

એતચ્છ્રુત્વા મહાતેજાઃ નષ્ટશોકોઽભવત્તદા ।
ધારયામાસ સુપ્રીતઃ રાઘવઃ પ્રયતાત્મવાન્ ॥

આદિત્યં પ્રેક્ષ્ય જપ્ત્વા તુ પરં હર્ષમવાપ્તવાન્ ।
ત્રિરાચમ્ય શુચિર્ભૂત્વા ધનુરાદાય વીર્યવાન્ ॥

રાવણં પ્રેક્ષ્ય હૃષ્ટાત્મા યુદ્ધાય સમુપાગમત્ ।
સર્વયત્નેન મહતા વધે તસ્ય ધૃતોઽભવત્ ॥

અધ રવિરવદન્નિરીક્ષ્ય રામં મુદિતમનાઃ પરમં પ્રહૃષ્યમાણઃ ।
નિશિચરપતિ સંક્ષયં વિદિત્વા સુરગણ મધ્યગતો વચસ્ત્વરેતિ ॥

॥ ઇત્યાર્ષે શ્રીમદ્રામાયણે વાલ્મિકીયે આદિકાવ્યે યુદ્ધકાંડે પંચાધિક શતતમઃ સર્ગઃ ॥

adityahridayastotra.co